শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমহালক্ষ্ম্যৈ নমঃ

শ্রীমদ্বেঙ্কটাধ্বরিবিরচিতে শ্রীলক্ষ্মীসহস্রে

# ॥ চিত্রচরিত্রস্তবকঃ ষোডশঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমহালক্ষ্ম্যৈ নমঃ

# ॥ চিত্রচরিত্রস্তবকঃ ষোডশঃ ॥

পৱিত্রং পদ্মনাভস্য কলত্রং তৎপুনাতু নঃ।
ৱিচিত্রং ত্রিষু লোকেষু চরিত্রং যস্য গীযতে॥ **16.1** ॥

অপ্রাকৃতেঽপি ভগৱানৱতাররূপে
প্রাযঃ প্রজানুগুণমেৱ করোতি জন্ম।
মাতস্ত্ৱযা হি মথিতে প্রথমে হি ভূতে
চিত্রং পুরা জনিরকারি তথা দ্ৱিতীযে॥ **16.2** ॥

খ্যাতো ভুৱি জ্ৱলনশীতলিমানুমানং
বাধানুৱিদ্ধমিতি তার্কিকসম্প্রদাযঃ।
ৱালানলে কমলৱাসিনি ৱাযুসূনোঃ
চিত্রং চকর্থ কৃপযা শিশিরং ৎৱমেৱ॥ **16.3** ॥

নিমগ্নমগ্নৌ কিল ৱস্তু ভূযো -
ঽপ্যুন্মজ্জতীতি ক্ৱ নু দেৱি দৃষ্টম্।
ৱপুর্ৱিচিত্রং তৱ ৱহ্নিমগ্নম্
উন্মজ্জনং মজ্জননি প্রপেদে॥ **16.4** ॥

স্ৱবাধকান্ সাধুজনোঽপি শক্তৌ
বাধেত পাথোধিসুতে জগত্যাম্।
বাধাৱিধাত্রীর্ভৱতী ররক্ষ
রক্ষঃস্ত্রিযঃ প্রত্যুত ৱাযুপুত্রাৎ॥ **16.5** ॥

শোকাদপেতঃ স তৱাৱলোকাৎ
পাকারিপাকঃ কিল কাক একঃ।
লোকাননেকান্ লভতে স্ম চিত্রং
নাকাধিপার্থ্যানপি ৱৃদ্ধগৃধ্রঃ॥ **16.6**॥

প্রায়ঃ স্ত্রিয়ঃ পত্যুরতিপ্রিয়াশ্চেৎ
পদ্মে সদা পার্শ্ৱমুপাশ্রয়ন্তে।
নিরন্তরং ৎৱং তু নিধীয়সেঽহো
ভুজান্তরে ভোগিনগেশ্ৱরেণ॥ **16.7**॥

কান্তঃ প্রিয়াং ৱহতি কামৱশাদ্ দৃশীতি
ৱাঙ্মাত্রমেৱ ভুৱি শুশ্রুম ৱার্ধিকন্যে।
আশ্চর্য মব্জনয়নো হরিরব্জগা ৎৱং
যুক্তং ততো দৃশি বিভর্তি তৱ প্রিয়স্ত্ৱাম্॥ **16.8**॥

সর্ৱে কিঞ্চিৎকুর্ৱতঃ স্ৱানুকূলান্
সংরক্ষন্তঃ প্রেক্ষিতাঃ সিন্ধুকন্যে।
অঞ্জল্যজ্ঞানার্জিতাগঃ প্রপঞ্চান্
অস্মাদৃক্ষানপ্যহো রক্ষসি ৎৱম্॥ **16.9**॥

দৃষ্টা ৱেণুং জডমপি জনা দেৱি ৱাচালয়ন্তঃ
কৃষ্ণোঽপ্যেনং মুখরয়তি চেৎকিং পুনস্তত্র চিত্রম্।
শ্লোকান্ মূকানপি চ ভৱতী ৱাদয়ত্যপ্রয়ত্নাৎ
চিত্রং শৌরেঃ সখি ৱয়মমী তত্র দৃষ্টান্তভূতাঃ॥ **16.10**॥

মাদৃক্ষরক্ষণকৃতে মকরাঙ্কমাতঃ
বাহান্তরে করুণয়া ভৱতী নিৱিষ্টা।
অর্চাত্মনা ধ্রুৱমৱস্থিতমঞ্জনাদ্রৌ
ৱিশ্ৱম্ভরং ৱিৱিধকার্যকরং করোতি॥ **16.11**॥

ৱিশ্ৱপ্রসূরপি ৎৱং ৱিচিত্রমুরগেন্দ্রশৈলপতিকান্তে।
মন্মাত্রাসাধারণমাতেৱ ৱিশিষ্য পুষ্যসি রমে মাম্॥ **16.12** ॥

॥ ইতি শ্রীমদ্বেঙ্কটাধ্ৱরিৱিরচিতে শ্রীলক্ষ্মীসহস্রে চিত্রচরিত্রস্তবকঃ ষোডশঃ ॥